Total Pages 02 PKC/PG/IS/SAN-101/17

**2017**

**M.A.**

**1st Semester Examination**

**SANSKRIT**

**PAPER – SAN – 101**

***Full Marks : 50***

***Time : 2 Hours***

***Answer all questions***

***The figures in the right hand margin indicate marks***

***Candidates are required to give their answers in their own words as far as practicable***

***Illustrate the answers wherever necessary***

*सर्वे प्रश्नाः सुरगिरा समाधेयाः।*

**1. अधःसमुद्धृतेषु यथाभिमतं मन्त्रद्वयमृषिच्छन्दोदेवतानिर्देशपुरःसरं सायणदिशा व्याख्यायताम्-** **6X2**

क) उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्।
नमो भरन्त एमसि ॥

ख) मित्रं हुवे पूतदक्षं वरुणं च रिशादसम्।
धियं घृताचीं साधन्ता ॥

ग) एतावानस्य महिमतो ज्यायाँश्च पुरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

घ) कालो अश्वो वहति सप्तरश्मिः सहस्राक्षो अजरो भूरिरेताः।
तमारोहन्ति कवयो विपश्चितस्तस्य चक्रा भुवनानि विश्वा ॥

***(Turn Over)***

**2. अधःस्तनयोरेकतरस्य भाष्यवचनस्याशयः स्पष्टीक्रियताम्-** **6**

क) आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या।

ख) वायव्ये तृचे प्रथमा ग्रहस्यैन्द्रवायवस्यैका पुरोऽनुवाक्या।

**3. अधःस्थेषु यथेच्छं पदद्वयस्य साधनप्रक्रिया प्रदर्शनीया-** **2X2**

क) रत्नधातमम् ख) दीदिविम् ग) उरूची घ)शर्मन् ङ) सहस्राक्षः।

**4.** नासदीयसूक्तस्य दार्शनिकतत्त्वं महत्त्वञ्च आलोच्येताम्। **8**

**अथवा**

शिवसङ्कल्पसूक्तानुसारं मनसः स्वरूपं प्रतिपाद्यताम्।

**5.** ऐतरेयब्राह्मणोक्तं शुनःशेपोपाख्यानं संक्षेपेण विलिक्य अत्र '**चरैवेति**' इत्यंशस्य का अन्तर्निहिता भावना ?- इति विशदीक्रियताम्। **10**

**अथवा**

**अधःसमुद्धृतं ब्राह्मणसन्दर्भद्वयं सप्रसङ्गं व्याख्यायताम्-** **5X2**

क) ऋणमस्मिन् संनयत्यमृतत्वं च गच्छति।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥

ख) अहरहः स्वाहा कुर्यादा काष्ठात् तथैनं ह देवयज्ञं समाप्नोति।

ग) तस्य वा एतस्य ब्रह्मयज्ञस्य वागेव जुहूर्मन उपभृच्चक्षुर्ध्रुवा मेधा स्रुवः सत्यमवभृथः स्वर्गो लोक उदयनम्।

**(*Internal Assessment :10 marks*)**

***समाप्तम्***